DOWNLOADED FROM HELLOZINDGI.COM
A COMPLETE WEBSITE FOR YOUR LIFESTYLE INCLUDING HEALTH AND RELIGION

# Panchayudha Stotram Lyrics In Sanskrit

स्फुरत्सहस्रारशिखातितीव्रं सुदर्शनं भास्करकोटितुल्यम् ।

सुरद्विषां प्राणविनाशि विष्णोश्चक्रं सदाऽहं शरणं प्रपद्ये ॥ १॥

विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ता ।

तं पाञ्चजन्यं शशिकोटिशुभ्रं शङ्खं सदाऽहं शरणं प्रपद्ये ॥ २॥

हिरण्मयीं मेरुसमानसारां कौमोदकीं दैत्यकुलैकहन्त्रीम् ।

वैकुण्ठवामाग्रकराभिमृष्टां गदां सदाऽहं शरणं प्रपद्ये ॥ ३॥

रक्षोऽसुराणां कठिनोग्रकण्ठच्छेदक्षरच्छोणितदिग्धधाराम् ।

तं नन्दकं नाम हरेः प्रदीप्तं खड्गं सदाऽहं शरणं प्रपद्ये ॥ ४॥

यज्ज्यानिनादश्रवणात्सुराणां चेतांसि निर्मुक्तभयानि सद्यः ।

भवन्ति दैत्याशनिबाणवल्लिः शाङ्र्गं सदाऽहं शरणं प्रपद्ये ॥ ५॥

इमं हरेः पञ्चमहायुधानां स्तवं पठेद्योऽनुदिनं प्रभाते ।

समस्तदुःखानि भयानि सद्यः पापानि नश्यन्ति सुखानि सन्ति ॥ ६॥

वनेरणे शत्रुजलाग्निमध्ये यदृच्छयापत्सु महाभयेषु ।

इदं पठन् स्तोत्रमनाकुलात्मा पठन् स्तोत्रमनाकुलात्मा सुखी भवेत्तत्कृतसर्वरक्षः ॥ ७॥

VISIT hellozindgi.com for entertainment, health, gossips, news and beliefs